# Shri Ganesha Stuti Kashikrita

# કાશિકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Kashikrita

File name : gaNeshastutiHkAshikRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM prathamaH khaNDaH | adhyAyaH 51 | 1.51 47-61||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 4, 2024

*sanskritdocuments.org*

# કાશિકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥
કાશ્યુવાચ ।
નમસ્તે ગણનાથાય નમસ્તેઽનન્તરૂપિણે ।
નમસ્તે સર્વદાત્રૈ વૈ માયાધારાય તે નમઃ ॥ ૪૭॥
ગજવક્ત્રધરાયૈવ શૂર્પકર્ણાય તે નમઃ ।
સર્વભૂષાય વૈ તુભ્યં વક્રતુણ્ડ નમોઽસ્તુ તે ॥ ૪૮॥
નિરાકારાય નિત્યાય નિર્ગુણાય ગુણાત્મને ।
વેદવેદ્યાય સતતં બ્રહ્મણે તે નમો નમઃ ॥ ૪૯॥
બ્રહ્મણાં બ્રહ્મદાત્રે ચ સિંહારૂઢાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમઃ સર્વાભયઙ્કર ॥ ૫૦॥
અનાથાય ચ નાથાય સર્વેષાં પાલકાય ચ ।
ભક્તેભ્યઃ સર્વદાત્રે તે વિઘ્નહર્ત્રે નમોઽસ્તુ તે ॥ ૫૧॥
વિઘ્નકર્ત્રે હ્યભક્તાનાં ભુક્તિમુક્તિપ્રદાય ચ ।
યોગિનાં હૃદિ સંસ્થાય યોગગમ્યાય તે નમઃ ॥ ૫૨॥
મનોવાણીવિહીનાય શાન્તિરૂપાય તે નમઃ ।
શાન્તેભ્યઃ શાન્તિદાત્રે ચ ગણેશાય નમો નમઃ ॥ ૫૩॥
કિં સ્તૌમિ ત્વાં ગણાધ્યક્ષ યત્ર વેદાઃ સશાસ્ત્રકાઃ ।
શાન્તિં પ્રાપ્તા મહાભાગા અતસ્ત્વાં પ્રણમામિ વૈ ॥ ૫૪॥
રક્ષ રક્ષ ચ દાસીં તે વિરહેણ પ્રપીડિતામ્ ।
અવિમુક્તા શિવેનૈવં નામ વ્યર્થં બભૂવ મે ॥ ૫૫॥
શિવહીના કૃતા દેવ દૈવં તુ પરમાદ્ભુતમ્ ।
અતસ્તે શરણં પ્રાપ્તા શઙ્કરં દર્શયસ્વ મામ્ ॥ ૫૬॥
ઇત્યુક્ત્વા પતિતા તસ્ય પાદયુગ્મે મહામુને ।
તામુત્થાપ્ય ગણાધીશો જગૌ મધુરયા ગિરા ॥ ૫૭॥
(ફલશ્રુતિઃ)

ગણેશ ઉવાચ ।
મા શોકં કુરુ કલ્યાણિ શઙ્કરં દર્શયામિ તે ।
અવિમુક્તમિદં નામ સાર્થકં પ્રભવિષ્યતિ ॥ ૫૮॥
ત્વયા કૃતમિદં સ્તોત્રં વિયોગહરણં ભવેત્ ।
યઃ પઠિષ્યતિ ભક્ત્યા ચ શ્રોષ્યતે તસ્ય સુન્દરિ ॥ ૫૯॥
યં યમિચ્છતિ ભાવેન તં તં દાસ્યામિ સર્વગઃ ।
બ્રહ્મભૂયકરં સ્તોત્રં ભવિષ્યતિ ન સંશયઃ ॥ ૬૦॥
ઇત્યુક્ત્વા ગણનાથશ્ચ તત્રૈવાન્તરધીયત ।
તમેવ સાપિ ધ્યાયન્તી સ્થિતા કાલપ્રતીક્ષિકા ॥ ૬૧॥

ઇતિ કાશિકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં પ્રથમઃ ખણ્ડઃ । અધ્યાયઃ ૫૧ । ૧.૫૧ ૪૭-૬૧॥

- .. mudgalapurANaM prathamaH khaNDaH . adhyAyaH 51 . 1.51 47-61..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Kashikrita*
pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*